१५

सृष्टिविचारः

प्रस्तावना -

प्रत्येकं दर्शनानाम् आलोचितेषु विषयेषु अन्यतमा तावत् सृष्टिः। कुतः अस्य विचित्ररचनात्मकस्य जगतः समुत्पत्तिः। कोऽयं जीवः। इत्येवं जिज्ञासा एव अध्यात्मवादस्य बीजम्। तथाहि आम्नायते ऋग्वेदीये नासदीयसूक्ते -

को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः।
अर्वाग् देवा अस्य विसर्जनेनाथा को वेद यत आ बभूव॥ इति।

समेषामेव दर्शनानां सृष्टिविषये भिन्नानि मतानि सन्ति। यथा सांख्यमते प्रकृतिरेव प्रपञ्चसृष्टेः बीजभूता, न्यायवैशेषिकमते तु नित्याः परमाणवः ईश्वरस्य सिसृक्षावशात् द्व्यणुकादिक्रमेण जगद्रूपेण परिणमन्ते। इत्थम् अद्वैतवेदान्तदर्शनस्यापि सृष्टिविषये स्वमतं विद्यते। अद्वैतवेदान्तमते अज्ञानाभिधेया अनिर्वचनीया माया एव प्रपञ्चसृष्टेः कारणम्। सृष्टिः इति अभ्युपगम्यमाने केषां कस्य वा सृष्टिः इति प्रश्नः उदेति। तथाहि दर्शनेऽस्मिन् सृष्टिर्वै जीव-जगदात्मकस्य प्रपञ्चस्य सृष्टिः इति अवगन्तव्यम्। अद्वैतवेदान्तदर्शनज्ञानाय तद्दर्शनसम्मतं सृष्टितत्त्वं नितरां ज्ञेयम्।

उद्देश्यानि

इमं पाठं पठित्वा भवद्भिः -

- अद्वैतवेदान्तदर्शनस्य सृष्टितत्त्वविषये विस्तरेण परिचयः लप्स्यते।
- अद्वैतवेदान्ते परमार्थतः सृष्टिरेव नास्तीति विषयः सुस्पष्टो भविष्यति।
- अद्वैतवेदान्तमते सृष्टिश्रुतीनाम् आशयः विस्तरेण ज्ञायेत।
- अद्वैतवेदान्तमते सृष्टिः निष्प्रयोजना इति ज्ञायेत।
- अध्यारोपापवादविषये विस्तरेण ज्ञायेत।
- विवर्तवादविषये परिणामवादविषये च ज्ञायेत।
- सृष्टिश्रुतीनां प्रयोजनं ज्ञायेत।
- ईश्वरस्य सृष्टिकारणत्वं ज्ञायेत।
- अज्ञानस्य शक्तिद्वयविषये विस्तरेण परिचयः लप्स्यते।

- कार्यकारणयोरनन्यत्वविषये परिचयः लप्स्यते।

१५.१) अद्वैतवेदान्तदर्शने परमार्थदृष्ट्या सृष्टिरेव नास्ति

इदमत्र ज्ञातव्यं यत् परमार्थदृष्ट्या अद्वैतवेदान्तदर्शने सृष्टिरेव नास्तीति। तथाहि अद्वैतसम्प्रदायविदां गौडपादानां कारिका-

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।

न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ इति।

श्लोकेऽस्मिन् निरुच्यते यत् प्रपञ्चस्य विनाशः नास्ति, उत्पत्तिरपि नास्ति, कश्चित् बद्धः अपि नास्ति, साधकः अपि नास्ति, मुमुक्षुरपि नास्ति, मुक्तः अपि नास्ति। बन्धसत्त्वे एव साधक-मुमुक्षु-मुक्तानां स्थितिप्रसङ्गः, बन्धाभावे मुक्तिरपि नास्तीति अवगन्तव्यम्। परमार्थतः सर्वे स्वस्वरूपे स्थिताः एव विद्यन्ते। इयं हि परमार्थदृष्टिः। व्यवहारदृष्ट्या तु बद्ध-मुक्तादिव्यवहारः समस्ति। तथाहि व्यवहारदृष्टिः परमार्थदृष्टिरिति द्विधा दृष्टिः अङ्गीकर्तुं शक्यते। व्यवहारदृष्ट्या सृष्टिः अङ्गीक्रियते अद्वैतवेदान्तदर्शने, न तु परमार्थदृष्ट्या। परमार्थदृष्ट्या तु अद्वैतं ब्रह्मैव केवलं विराजते, नास्ति तत्र सृष्ट्यादिकार्यजातम्।

ननु यदि सृष्टिरेव नास्ति अद्वैतदर्शनमते तर्हि पुनः सृष्टिविषयः दर्शने अस्मिन् आलोचितः आलोचयिष्यते वेति वक्तुं न शक्यते। किञ्च, सृष्टिः न अभ्युपगम्यते चेद् अस्माभिः दृश्यमानम् इदं जगत् कुतः आगतम् इति प्रश्नस्य उत्तरं न प्राप्यते। अतः व्यवहारसिद्धये अद्वैतिभिः अवश्यं सृष्टिः अभ्युपगन्तव्या, तत्कारणं च निरूपणीयम्। अन्यथा इदं दर्शनं व्यवहारसिद्धम् अनङ्गीकुर्वत् अलौकिकं कपोलकल्पितं च स्वीकुर्वत् प्रेक्षावताम् अनादरणीयताम् आप्नुयात्, सामान्यजनानां च हेयताम् अधिगच्छेत्। तस्मात् अद्वैतवेदान्तदर्शने सृष्टितत्त्वम् अङ्गीकरणीयम् इति चेदुच्यते अद्वैतदर्शने सृष्टिः अङ्गीक्रियते एव, तस्मात् नास्ति दर्शनेऽस्मिन् अलौकिकी काचित् कल्पना। परन्तु सृष्टेः अस्ति भिन्नं तात्पर्यम्। किं तदिति अग्रे प्रतिपादिष्यते।

१५.२) सृष्टिश्रुतीनाम् आशयः

अद्वैतवेदान्तमते सच्चिदानन्दम् अद्वयं ब्रह्मैव वस्तु, तद्व्यतिरिक्तम् उपलभ्यमानं सर्वमपि मायाकल्पितम्। अतः सर्वजनप्रत्यक्षं जगत् मायाकल्पितम्। तथाहि उच्यते विवेकचूडामणौ-

माया मायाकार्यं सर्वं महदादिदेहपर्यन्तम्।

असदिदमनात्मकं त्वं विद्धि मरुमरीचिकाकल्पम्॥ इति।

अस्यार्थो हि सांख्यस्वीकृतात् अतिसूक्ष्मात् महत्तत्त्वात् आरभ्य अतिस्थूलदेहपर्यन्तं सर्वं मायाकार्यम्। अतः ब्रह्मव्यतिरेकेण सर्वं मरुमरीचिकातुल्यम् असदिति ज्ञातव्यम्। परन्तु इदं निष्प्रपञ्चं ब्रह्म न साधारणैः मनसापि कल्पयितुं शक्यम्। अतः यथा निष्प्रपञ्चस्य ब्रह्मणोः बोधः साधारणजनानां भवेत् तदर्थं सविशेषस्य ब्रह्मणःनिरूपणं शास्त्रकारैः आदौ क्रियते। तथाहि-

निर्विकल्पं परं ब्रह्म साक्षात्कर्तुम् अनीश्वराः।

ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥ इति।

ये मन्दाः ते निर्विकल्पं परं ब्रह्म साक्षात्कर्तुं न प्रभवन्ति, तस्मात् तेषां कृते भगवती श्रुतिः अनुकम्पया सविशेषं ब्रह्म उपदिशति इति श्लोकस्यास्य आशयः।

सविशेषं ब्रह्म निर्विशेषं ब्रह्म इति एकस्यैव ब्रह्मणः द्विविधरूपकल्पना। निर्विशेषं ब्रह्म हि नामरूपोपाधिविवर्जितं शुद्धं स्वरूपम् सत्यज्ञानानन्तादिपदलक्ष्यम्। न हि निर्विशेषं ब्रह्म सर्वैः कल्पयितुं शक्यते इति कारणात् नामरूपोपाधिसम्बन्धः तस्मिन् शुद्धे ब्रह्मणि कल्प्यते। तेन च नामरूपोपाधिविशेषसम्बन्धित्वात् ब्रह्म सविशेषमिति अभिधीयते। तदेव सविशेषं ब्रह्म सृष्टिस्थितिप्रलयकारित्वेन ईश्वरः इत्यभिधीयते।

ननु सविशेषेण ब्रह्मणा सह सृष्टेः कः सम्बन्धः इति चेत् सविशेषं ब्रह्म अर्थात् ईश्वरो हि प्रपञ्चस्य सृष्टि-स्थिति-प्रलयकारणम्। अतः जगतः सृष्टिकर्ता ईश्वर इति लभ्यते। निर्विशेषं ब्रह्मैव सृष्टिकर्तृत्वेन सविशेषं ब्रह्म अर्थात् ईश्वर इत्यभिधीयते। एवं सविशेषस्य ब्रह्मण उपदेशेन सृष्ट्यादिरपि अर्थतः उपदिष्टो भवति। सविशेषस्य च ब्रह्मण उपदेशेन निर्विशेषं ब्रह्मैव वस्तुतः निर्दिदिक्षितं श्रुत्या इति ज्ञातव्यम्। तस्मादेव सृष्ट्यादिकं वर्णयति श्रुतिरिति आशयः। ये तावत् सविशेषं ब्रह्म जानन्ति ते शुद्धचित्ताः सन्तः सविशेषात् ब्रह्मणः सृष्टिकर्तृत्वादिविशेषत्यागेन निर्विशेषं ब्रह्म वेदितुं शक्नुवन्ति।

सृष्टिश्रुतीनां तात्पर्यविषये श्रीशङ्करभगवत्पादैः शारीरकमीमांसाभाष्ये उच्यते- “न चेयं परिणामश्रुतिः (सृष्टिप्रतिपादिका श्रुतिः) परिणामप्रतिपादनार्था, तत्प्रतिपत्तौ फलानवगमात्। सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था हि सा।” इति। इतः ज्ञायते यत् सृष्टिप्रतिपादने अपि अस्ति अन्यत् किञ्चित् तात्पर्यं श्रुतेः। न केवलं सृष्टिप्रतिपादनार्था एव प्रपञ्चस्य सृष्टिः प्रदर्श्यते श्रुतौ, अपि तु ब्रह्म लक्षयितुं बोधयितुमेव श्रुतिः सृष्टिं प्रतिपादयति। केन प्रकारेण सृष्टिश्रुतयः ब्रह्म बोधयन्तीति चेदुच्यते - यस्मात् कारणात् सृष्टिः भवति तत् कारणं ब्रह्मैव इति कारणमुखेन सृष्टिश्रुतयः ब्रह्म बोधयन्ति। तथाहि बादराणयकृतं ब्रह्मलक्षणपरकं शारीरकमीमांसासूत्रं "जन्माद्यस्य यतः” इति। यस्मात् अस्य जगतः सृष्टिः, यस्मिन् स्थितिः प्रलयश्च सम्भवति तद् ब्रह्म इति सूत्रस्यास्य सामान्यार्थः। तथाहि सूत्रस्यास्य भाष्ये शङ्करभगवत्पादैः उच्यते - “अस्य जगतो नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति, तद्ब्रह्मेति” इति। तैत्तिरीयश्रुतौ अपि आम्नायते -

“यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।

यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।” (३.१.१) **इति।**

अतः ब्रह्म निर्दिदिक्षुरेव श्रुतिः सृष्टितत्त्वं प्रतिपादयतीति अद्वैतवेदान्तिनाम् अभिप्रायः।

१५.३) अध्यारोपापवादन्यायः -

सृष्टिविचारप्रसङ्गे अद्वैतवेदान्तिनाम् अध्यारोपापवादन्यायः प्रसिद्धः। तथाहि अद्वैतिनां प्रसिद्धः श्लोकः -

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते।

शिष्याणां बोधसिद्ध्यर्थं तत्त्वज्ञैः कल्पितः क्रमः॥ इति।

अस्यार्थो हि - निष्प्रपञ्चं ब्रह्म अल्पज्ञान् शिष्यान् बोधयितुमेव तत्त्वज्ञैः आचार्यैः अयम् अध्यारोपापवादन्यायः स्वीकृतः। तस्मादेव श्रुतौ सविशेषस्य ब्रह्मणः सृष्ट्यादीनां च वर्णनं प्राप्यते। निर्विशेषे ब्रह्मणि सृष्ट्यादिकर्तृत्वमारोप्य सविशेषं ब्रह्म विज्ञाते सति सृष्ट्यादिकर्तृत्वम् अपोह्य निर्विशेषं ब्रह्म निर्देष्टुम् इष्यते शास्त्रैः। अयम् आरोपः आहार्यारोपः, न तु वस्तुगत्या आरोपः।

ननु किं नाम अध्यारोपः, किं च अपवादः। तथाहि– अध्यारोपो नाम वस्तुनि अवस्त्वारोपः इति। सच्चिदानन्दम् अद्वयं ब्रह्म एव वस्तु, तद्विहाय अखिलम् अवस्तु। अतः सत्यभूते ब्रह्मणि अनित्यसर्ववस्तूनाम् मिथ्याभूतः आरोपः अध्यारोपः। तथाह्युच्यते वेदान्तसारकृता सदानन्दयोगीन्द्रेण– "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोपः" इति। अल्पान्धकारे रज्जुं दृष्ट्वा सर्पः इति ज्ञानं भवति। तदा वस्तुतः रज्जुः रज्जुस्वरूपेण एव तिष्ठति, परन्तु अज्ञानवशात् द्रष्टा सर्परूपेण रज्जुं पश्यति। तदा स रज्जुस्वरूपम् अजानन् "अयं सर्पः" इति व्यवहरति। एवम् असर्पभूतायां रज्जौ यथा सर्पस्य मिथ्याभूतः आरोपः तद्वत् अकर्तरि ब्रह्मणि अपि सृष्ट्यादिकर्तृत्वस्य मिथ्याभूतः यः आरोपः सः अध्यारोपः। परन्तु अयम् आरोपः शास्त्रेण ब्रह्मतत्त्वावबोधाय क्रियते इति कारणाद् आहार्यारोपत्वेन ज्ञेयः।

अपवादो नाम "रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्" इति। अस्यार्थो हि – रज्जुस्वरूपापरित्यागेन सर्पाकारेण भासमानस्य रज्जुविवर्तस्य अपवादो नाशो नाम अधिष्ठानरज्जुमात्रतया अवस्थानम्। एवं ब्रह्मविवर्तस्य अज्ञानादिप्रपञ्चस्य नाशो नाम ब्रह्मस्वरूपमात्रेण अवस्थानम् इति। यदा रज्जौ सर्पारोपः मिथ्याभूतः इति यथार्थज्ञानं भवति तदा रज्जुः रज्जुस्वरूपेण एवावतिष्ठते, एवं यदा ब्रह्मविवर्तभूतोऽयं प्रपञ्चः मिथ्याभूतः अथवा ब्रह्मणि जगत्कर्तृत्वादिकं मिथ्याभूतमिति यथार्थज्ञानं भवति तदा निर्विशेषं ब्रह्म स्वस्वरूपेणैव अवतिष्ठते। अयं अधिष्ठानमात्रत्वेन स्वरूपावस्थितिरेव अपवादः।

विवर्तस्यास्य जगतः सन्मात्रत्वेन दर्शनम्।

अपवाद इति प्राहुरद्वैतब्रह्मदर्शिनः॥ इति।

एवं ब्रह्मणि अखिलं जगत् अध्यारोप्य अन्ते नास्ति ब्रह्मणि किञ्चिदपि इति अपोह्य निर्विशेषं ब्रह्म बोधयति श्रुतिः अद्वैतवेदान्तवादिनां मतम्।

पाठगतप्रश्नाः-१

१. परमार्थदृष्ट्या अद्वैतदर्शने सृष्टिः नास्तीत्यत्र प्रमाणभूता गौडपादानां कारिका का।

२. अद्वैतवेदान्तमते सविशेषस्य ब्रह्मणः निरूपणं शास्त्रे केषां कृते क्रियते।

३. एकस्यैव ब्रह्मणः द्विविधं रूपं किम्।

४. निर्विशेषं ब्रह्म नाम किम्।

५. ब्रह्मणः सविशेषत्वं किमर्थम्।

६. सृष्टिश्रुतयः किमर्था।

७. सृष्टिविचारप्रसङ्गे अद्वैतवेदान्तिनां कः न्यायः प्रसिद्धः।

क) तृणारणिमणिन्यायः ख) शाखाचन्द्रमसन्यायः ग) अध्यारोपापवादन्यायः घ) तिलतण्डुलन्यायः।

८. अध्यारोपः नाम कः।

९. अपवादो नाम कः।

१०. अध्यारोपस्य एको दृष्टान्तः प्रदीयताम्।

१५.४) विवर्तवादः परिणामवादश्च

ब्रह्मविवर्तस्य जगतः ब्रह्ममात्रत्वम् अपवादः इति अपवादविषये उक्तम्। परन्तु ब्रह्मणः विवर्तभूतमिदं जगत् आहोस्वित् परिणामभूतं जगदिति निःसंशयेन कथं ज्ञातुं शक्यते। अतः विवर्तवादविषये परिणामवादविषये च सामान्यं ज्ञानमादौ आवश्यकम्। यथास्वरूपेण अवस्थितस्य वस्तुनः अन्यथाभावो द्विधा भवति - परिणामभावः विवर्तभावश्चेति। ननु को नाम परिणामभावः इति चेदुच्यते - तत्र परिणामभावो नाम वस्तुनो यथार्थतः स्वरूपं परित्यज्य स्वरूपान्तरापत्तिः, यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिणमते। ननु कः नाम विवर्तः इति चेदुच्यते - स्वस्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः विवर्तः इति। यथा - शुक्तिका स्वस्वरूपापरित्यागेन रजतरूपेण मिथ्या प्रतीयते, रज्जुश्च स्वस्वरूपापरित्यागेन सर्परूपेण मिथ्या प्रतीयते। तथाहि उच्यते विवर्तवादविषये -

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः।

अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदाहृतः॥ इति।

सरलार्थः - यदा कस्यचित् वस्तुनः वस्तुगत्या अन्यथारूपेण विकारः भवति तदा विकार इति उच्यते अर्थात् परिणामः इति उच्यते। यथा दुग्धं दधिरूपेण परिणमते। वस्तुगत्या एव दुग्धस्य दधिरूपेण परिणामः भवति। दुग्धं स्वं स्वरूपं परित्यज्य नूतनं दधिरूपं गृह्णाति। परन्तु यदा कस्यचित् वस्तुनः

वस्तुगत्या अन्यथारूपेण विकारः न भवति, वस्तु तेनैव रूपेण विराजते, परन्तु भ्रान्त्या वस्तु भिन्नरूपेण प्रतीयते तदा स विवर्तः इति उच्यते। यथा शुक्तौ इदं रजतमिति भ्रमज्ञाने सति रजतं स्वीकर्तुं भ्रान्तजनस्य प्रवृत्तिः भवति। वस्तुतः शुक्तिः शुक्तिरूपेण एव विराजते, न तु रजतरूपेण। रजतरूपं यत् कार्यं भ्रान्त्या प्रतिभाति, वस्तुगत्या तत् मिथ्याभूतम्। एवं कारणस्य वस्तुतः तथात्वेनैव स्थितिः, भ्रान्त्या च कारणस्य मिथ्याकार्यत्वेन प्रतीतिः एव विवर्तः। एतन्मते कारणमेव कार्यस्वरूपेण भासते इति कारणस्यैव सत्यत्वं, न तु कार्यस्य सत्यत्वम्। एका कारणसत्ता एव विविधकार्याकारेण भासिता भवति, सुवर्णं कुण्डलाकारेण भासते, मृच्च घटाकारेण। कुण्डलं यथा सुवर्णस्यैव आकारभेदः, घटश्च मृत्तिकायाः तथा परिदृश्यमानं जगदपि सद्वस्तुनः विविधाकारमात्रम्। प्राक् सृष्टेः सन्मात्रमेव इदमासीत्, नातिरिक्तं किञ्चिदप्यासीत्। घटशरावादयः यथा परस्परं विभिन्ना अपि मृत्तिकातः नातिरिच्यन्ते, पिण्डस्य घटात् घटस्य च पिण्डात् भेदेऽपि मृत्तिकातो द्वयोरपि अभिन्नत्वात्, तथैव विविधसृष्टपदार्थाक्रान्तः संसारोऽपि वस्तुतः सद् नातिरिच्यते, अपि तु सतः एव रूपान्तरं संसारः, यत् सद् वस्तु तद् ब्रह्मैव। अद्वैतवेदान्तमते अविद्याकारणाद् इदं मिथ्याभूतं जगत् परमार्थसत्यभूते ब्रह्मणि अध्यस्यते, ब्रह्मज्ञाने सति अविद्यायाः नाशः भवति, तेन मिथ्याभूतं जगदपि ब्रह्मणि बाधितं भवति। अयमेव विवर्तवादः अनिर्वचनीयकारणवादः सत्कारणवादः वेति अभिधीयते।

अप्पय्यदीक्षितेन परिणामविवर्तयोः किञ्चिद् भिन्नप्रकारेण उपस्थापनं कृतम्। तन्मते समसत्ताकोऽन्यथाभावः परिणामः, विषयसत्ताकोऽन्यथाभावः विवर्तः इति। तथाहि त्रिविधा सत्ता अद्वैतवेदान्ते अङ्गीक्रियते – प्रातिभासिकी च सत्ता, व्यावहारिकी सत्ता, पारमार्थिकी सत्ता चेति। प्रतिभासमात्रं यस्य वस्तुनः सत्ता सा प्रातिभासिकी सत्ता, यथा रज्जौ सर्पस्य या सत्ता सा प्रतिभासमात्रत्वात् प्रातिभासिकी सत्ता, अथवा स्वप्नस्य या सत्ता सा प्रातिभासिकी सत्ता। सा च सत्ता व्यवहारेण बाध्यते। व्यवहारबाध्यत्वं प्रातिभासिकत्वम् इत्यपि प्रातिभासिकस्य लक्षणं कर्तुं शक्यते। व्यावहारिकस्य प्रपञ्चस्य या सत्ता सा व्यावहारिकी सत्ता। सा च पारमार्थिकेन ब्रह्मज्ञानेन बाध्यते। अतः पारमार्थिकसत्ताबाध्यत्वं व्यावहारिकत्वमिति। पारमार्थिकी सत्ता हि नित्या। एवं किञ्चिद् वस्तु यदा समानसत्ताकम् अन्यथाभावं प्राप्नोति तदा स परिणामः इत्युच्यते। यथा मृद् घटरूपेण यदा अन्यथाभावं प्राप्नोति तदा मृद्घटयोः व्यावहारिकत्वेन समानसत्ताकत्वात् परिणामः ज्ञेयः, न तु विवर्तः। यदा च रज्जुः सर्परूपेण अन्यथाभावं प्राप्नोति तदा रज्ज्वाः व्यावहारिकत्वेन सर्पस्य च प्रातिभासिकत्वेन विषमसत्ताकत्वात् रज्जुसर्पयोः विवर्तः ज्ञेयः।

१५.५) सृष्टिप्रयोजनम् -

सांख्यदर्शने यथा त्रिगुणात्मिकायाः प्रकृतेः भोगार्थं, पुरुषस्य च कैवल्यार्थं प्रकृतेः प्रवृत्तिः सप्रयोजना अवलोक्यते, तद्वत् अद्वैतवेदान्तदर्शने अस्ति वा सृष्टेः किञ्चित् प्रयोजनम्, येन प्रयोजनेन प्रेरितः ईश्वरः प्रपञ्चं सृजति इति चेदुच्यते - अविद्याकल्पितनामरूपव्यवहारविषया सृष्टिः इति कारणात्

सृष्टिश्रुतयः न परमार्थविषयाः इति अद्वैतवेदान्तिभिः अङ्गीकारात् परमार्थतः न किञ्चित् प्रयोजनम् अन्वेष्टव्यम् सृष्टेः। किञ्च, सृष्टिश्रुतीनां ब्रह्मबोधने एव तात्पर्यम् इति स्वीकारात् ब्रह्मप्रतिपादनार्था सृष्टिश्रुतयः इति व्यवहारदृष्ट्या सृष्टिश्रुतीनाम् अस्ति तावत् प्रयोजनवत्त्वम्।

ननु काचित् प्रवृत्तिः विद्यते चेत् तस्य प्रयोजनम् अङ्गीकर्तव्यमेव। तथाहि प्रसिद्धोक्तिः - प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति। जगत्सृष्टिरूपा महती प्रवृत्तिः अस्ति चेत् तस्याः प्रवृत्तेरपि प्रयोजनम् अङ्गीकरणीयमेव, अन्यथा यथा उन्मत्तस्य निष्प्रयोजना प्रवृत्तिः अवलोक्यते तद्वत् ईश्वरस्यापि निष्प्रयोजनत्वेन प्रवृत्तिमत्त्वाद् उन्मत्तताप्रसङ्गः समापतति इति चेदुच्यते लीलारूपा एव इयम् जगत्सर्जनरूपा प्रवृत्तिः ईश्वरस्य, न तु सप्रयोजना। तथाहि बादरायणकृतं ब्रह्मसूत्रं - "लोकवत्तु लीलाकैवल्यम्" इति। यथा लोके कश्चित् आप्तकामः राजा किञ्चित् प्रयोजनम् अनभिसन्धाय एव क्रीडा-विहारादिषु प्रवर्तते, यथा वा श्वासप्रश्वासौ बाह्यं किञ्चित् प्रयोजनम् अन्तरेण स्वभावादेव सम्भवति, तद्वद् ईश्वरस्यापि अनपेक्ष्य किञ्चित् प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिः सम्भवति। ईश्वरस्य प्रवृत्तिः सप्रयोजना इति युक्तितः श्रुतितः वा नैव सम्भवति। आप्तकामस्य ईश्वरस्यापि सप्रयोजनत्वं स्वीक्रियते चेत् तस्य आप्तकामत्वमेव न सिध्यति, आप्तकामत्वं स्वीक्रियते चेत् सप्रयोजनत्वं नैव सिध्यति। श्रुतौ हि ईश्वरस्य आप्तकामत्वं पुनः पुनः उपदिश्यते इति कारणात् आप्तकामस्य ईश्वरस्य लीलारूपा निष्प्रयोजना एव जगत्सृष्टिरूपा प्रवृत्तिः इत्यवगन्तव्यम्। यद्यपि अस्माकं कृते इयं जगद्बिम्बरचना महतीति भाति तथापि अपिरिमितशक्तिमत्त्वात् ईश्वरस्य तु लीलारूपैव जगत्सृष्टिः। यदि नाम लोके लीलास्वपि किञ्चित्सूक्ष्मं प्रयोजनम् अस्तीति उत्प्रेक्ष्येत, तथापि ईश्वरस्य जगत्सृष्टिविषये नैव किञ्चित् प्रयोजनम् उत्प्रेक्षितुं शक्यते, तस्य आप्तकामत्वश्रुतेः। तथाह्युच्यते गौडपादाचार्येण माण्डूक्यकारिकायाम् -

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे।

देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा॥ इति। [१.९]

अतः ईश्वरस्य स्वभावरूपेयं प्रवृत्तिः। ननु अप्रयोजनत्वात् मास्तु सृष्टिप्रवृत्तिः इति चेन्न, सृष्टिरस्तीति श्रुतिः स्वयं प्रतिपादयतीत्यतः सृष्टिप्रवृत्तिः मास्तु इति श्रुतिविरुद्धं नैव शक्यते अङ्गीकर्तुम्। उन्मत्तप्रवृत्तिवत् निष्प्रयोजनत्वाद् ईश्वरस्य उन्मत्तताप्रसङ्गः इत्यपि वक्तुं नैव शक्यते ईश्वरस्य सर्वज्ञत्वश्रुतेः। अतः लीलारूपा निष्प्रयोजना एव जगत्सृष्टिरूपा प्रवृत्तिः ईश्वरस्य।

१५.६) ईश्वरस्य वैषम्यनैर्घृण्यप्रसङ्गविचारः -

ईश्वर एव जगत्स्रष्टा इति अभ्युपगम्यते चेत् ईश्वरस्य वैषम्यं नैर्घृण्यं च आपतति। तथाहि दृश्यते हि लोके केचिद् देवादयः आजन्मनः सुखिनः, पश्वादयश्च दुःखिनः, मनुष्याश्च कदाचित् सुखिनः कदाचित् दुःखिनः, केचित् धनिकाः, केचन दरिद्राः, केचिद् अन्धबधिराः, केचन अतीवसुन्दरदर्शनाः, केचित् कुत्सितदर्शनाः इति। एवं विषमां सृष्टिं निर्मिमाणस्य ईश्वरस्य खलजनस्य इव रागद्वेषौ सम्भवतः,

अन्यथा एतादृशस्य वैषम्यस्य कारणं किं वा स्यात्। अपि च, क्रूरजनः यथा सुखिनः अपि जनान् दुःखेन संयुनक्ति तथैव ईश्वरः अपि घृणावशात् दुःखयोगविधानेन मनुष्यान् दुःखभाजः करोति इति विषमसृष्टिकारित्वेन दुःखयोगविधानेन च ईश्वरस्य वैषम्यं नैर्घृण्यं च आपतति। परन्तु शुद्धस्वभावः ईश्वरः वैषम्यनैर्घृण्यदोषभाक् भवितुं नार्हति, अतः नास्ति ईश्वरः विषमायाः सृष्टेः कारणम् इति चेदुच्यते न ईश्वरः एव जगत्स्रष्टा। न हि ईश्वरः निरपेक्षः सन् विषमां सृष्टिं निर्मिमीते, अपि तु सापेक्षः एव ईश्वरः विषमां सृष्टिं निर्माति। तथाहि बादरायणकृतं सूत्रं – "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति" [२.१.३४] इति। किम् अपेक्ष्यते ईश्वरः इति चेद् धर्माधर्माख्यानि कर्माणि इत्यर्थः। तथाहि उच्यते भाष्यकारैः श्रीमच्छङ्करभगवत्पादैः – "सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः; ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः – यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति, व्रीहियवादिवैषम्ये तु तत्तद्बीजगतानि एवासाधारणानि सामर्थ्यानि कारणानि भवन्ति, एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति, देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतानि एवासाधारणानि कर्माणि कारणानि भवन्ति; एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति" इति। ईश्वरो हि प्राणिनां फलदानाय उन्मुखानि कर्माणि अपेक्ष्य एव सृष्टिं करोति। यस्य कर्मफलं यादृशं स तादृशमेव जन्म प्राप्नोति, तादृशं सुखदुःखादिकं च प्राप्नोति। अतः कर्मापेक्षत्वात् न विद्येते वैषम्यनैर्घृण्यदोषौ ईश्वरस्य। कथं पुनरवगम्यते यत् सापेक्ष ईश्वरो नीचमध्यमोत्तमं संसारं निर्मिमीत इति। तथा हि दर्शयति श्रुतिः — 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' (कौषितकीब्राह्मणम् ३.८) इति, 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन' (बृहदारण्यकोपनिषत् ३.२.१३) इति च। स्मृतिरपि प्राणिकर्मविशेषापेक्षम् एवेश्वरस्य अनुग्रहीतृत्वं निग्रहीतृत्वं च दर्शयति। तथाह्युच्यते भगवता वासुदेवेन श्रीमद्भगवद्गीतासु —

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ इति। [४.११]

पाठगतप्रश्नाः-२

११. को नाम परिणामः।

१२. को नाम विवर्तः।

१३. अप्पय्यदीक्षितमते को नाम परिणामः, कश्च विवर्तः।

१४. अद्वैतवादिनां सत्तात्रयं किम्।

१५. किं नाम व्यावहारिकत्वम्।

१६. अद्वैतमते परमेश्वरस्य सृष्टिप्रवृत्तिः किंरूपा।

क) सप्रयोजना　　ख) लीलारूपा　　ग) भोगरूपा　　घ) मोक्षरूपा

१७. किमपेक्ष्य सृष्टौ प्रवर्तते ईश्वरः।

१८. विषमा सृष्टिः किमर्था।

१५.७) ईश्वरः एव जगतः सृष्टिकारणम् -

अद्वैतवेदान्तमते ईश्वरः एव जगतः सृष्टिकारणम्। स च ईश्वरः स्वीयाम् मायाशक्तिम् अवलम्ब्य जगत् सृजति। मायाशक्तिरेव अज्ञानमिति उच्यते। तस्य अज्ञानस्य लक्षणं निगदितं सदानन्दयोगीन्द्रेण वेदान्तसारे - "अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित्" इति। पञ्चदशीकारेण विद्यारण्यस्वामिना तु सत्त्वगुणस्य तारतम्यानुसारेण अविद्या माया चेति अज्ञानस्य द्विरूपता कल्पिता। पञ्चदशीकारमते अविशुद्धसत्त्वात्मिका अविद्या हि जीवस्योपाधिः, विशुद्धसत्त्वात्मिका माया हि ईश्वरस्य। तस्मात् मायोपाधिकः ईश्वरः, अविद्योपाधिकश्च जीवः। यद्यपि माया ईश्वरस्य उपाधिः तथापि माया ईश्वरस्य अधीने तिष्ठति इति ईश्वरो न मायापरतन्त्रः। अविद्योपाधिकः जीवस्तु अविद्यायाः अधीने तिष्ठति इति कारणात् अविद्यापरतन्त्रः। इत्थम् मायाविद्ययोः भेदः अवगन्तव्यः। तथाह्युच्यते पञ्चदश्याम् -

सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते।

मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः॥

अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा। इति।

पुनश्च तदज्ञानं समष्टि-व्यष्टिभेदेन द्विधा। समष्ट्यज्ञानोपहितं चैतन्यम् ईश्वरः इति, व्यष्ट्यज्ञानोपहितं चैतन्यं प्राज्ञः जीवः इति व्यवह्रियते।

यद्यपि अज्ञानमाश्रित्य ईश्वरः सृजति तथापि केवलम् अज्ञानं न प्रपञ्चस्य कारणम्। अपि तु स्वयम् ईश्वर एव जगतः निमित्तकारणम् उपादानकारणं च। यथा चेतनः कुम्भकारः घटं प्रति निमित्तकारणं तथैव ईश्वरः चैतन्यप्रधानतया जगतः निमित्तकारणम्। यथा मृत्तिका घटं प्रति उपादानकारणं तथैव ईश्वरः स्वोपाधिमायाप्रधानतया जगतः उपादानकारणं च भवति। एकमेव वस्तु उपादानकारणं निमित्तकारणं चेत्यत्र दृष्टान्तो हि लूता। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतया च उपादानकारणं भवति तथैव ईश्वरोऽपि चैतन्यप्रधानतया जगतः निमित्तकारणम्, अचेतनमायाप्रधानतया च उपादानकारणमिति जगतः अभिन्नं निमित्तोपादनकारणम् अवगन्तव्यम्। तथाह्युच्यते सर्ववेदान्तसारसंग्रहे –

यथा लूता निमित्तञ्च स्वप्रधानतया भवेत्।

स्वशरीरप्रधानत्वेनोपादानं तथेश्वरः॥

निमित्तमप्युपादानं स्वयमेव भवन् प्रभुः।

चराचरात्मकं विश्वं सृजत्यवति लुम्पति॥ इति।

ननु ईश्वरस्य अभिन्ननिमित्तोपादानकारणत्वे अस्ति वा किञ्चित् श्रुतिप्रामाण्यमिति चेत् "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतिवाक्यमेव ब्रह्मणः अभिन्ननिमित्तोपादानकारणतां ज्ञापयति। सृष्टिकर्तृत्वेन ईश्वरः जगतः निमित्तकारणं, परन्तु ईश्वरः न केवलं सृजति सृज्यमानपदार्थेषु अपि सः अनुवर्तते इति अनुप्रवेशश्रुत्या तस्य उपादानकारणत्वम् आम्नायते। ननु अचेतनस्य जडस्य प्रपञ्चस्य उपादानकारणं चेतनः ईश्वरः इति न सङ्गच्छते, कार्यकारणयोरनन्यत्वात्। यदि च ईश्वरस्य उपादानकारणत्वम् अभ्युपगम्येत तर्हि कार्यकारणयोरभेदनियमात् प्रपञ्चस्यापि चैतन्यरूपत्वप्रसङ्गः नित्यता च स्यादिति चेदुच्यते - प्रथमतः कार्यकारणयोरनन्यत्वेऽपि चेतनात् अचेतनस्य अचेतनात् च चेतनस्य उत्पत्तिः लोके दृश्यते इति कारणात् नायम् एकानन्तो नियमो यत् चेतनम् अचेतनस्य उपादानकारणं भवितुं नार्हतीति। तथाहि लोके अचेतनात् गोमयात् चेतनानां वृश्चिकादीनां, चेतनात् च मनुष्यशरीराद् अचेतनानां नखकेशादीनाम् उत्पत्तिः दृश्यते। द्वितीयतः, कार्यकारणयोरभेदे सत्यपि सर्वे एव कारणगुणाः कार्ये भवेयुरिति नास्ति नियमः। सर्वे कारणगुणाः कार्ये भवेयुरिति स्वीक्रियमाणे च इदं कारणम् इदं च कार्यमिति कार्यकारणयोः व्यवहारभेदः एव न स्यात्। तृतीयतः, चेतनः ईश्वरः तावत् प्रपञ्चस्य विवर्तोपादनकारणं न तु परिणाम्युपादानकारणं, जगतः परिणाम्युपादानकारणं तु अज्ञानाभिधेया मायैव। ईश्वरस्य विवर्तोपादानत्वात् नास्ति जगतः चेतनत्वप्रसङ्गः नित्यता च। अतः चेतनस्य ईश्वरस्य उपादानकारणत्वे नास्ति कश्चिद् दोषः। चतुर्थतः, यथा अयस्कान्तसन्निधाने जडमपि लोहं चेष्टते, तथा चैतन्यसन्निधाने जडमज्ञानं चेष्टते इति अज्ञानविकारं प्रति चेतनस्य निमित्तत्वं, जडाकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविनः ईश्वरस्यापि परम्परया गौणतया उपादानत्वं न विरुद्ध्यते।

१५.८) अज्ञानस्य शक्तिद्वयम् –

अज्ञानस्य शक्तिद्वयम् अङ्गीक्रियते अद्वैतिभिः। आवरणशक्तिः विक्षेपशक्तिश्च। आवरणशक्त्या वस्तुस्वरूपम् आच्छाद्यते, विक्षेपशक्त्या च नूतनं वस्तु प्रतीयते। तथाहि - भ्रान्तिवशात् यत्र रज्जौ सर्पः प्रतीयते तत्र प्रथमतः आवरणशक्त्या रज्जुस्वरूपम् आच्छाद्यते। ततः विक्षेपशक्त्या रज्जौ सर्पः इति नूतनं वस्तु प्रतीयते। यत्र च भ्रान्त्या शुक्तौ रजतमिति प्रतीयते तत्र अज्ञानस्य आवरणशक्त्या शुक्तिस्वरूपम् आच्छादितं भवति, अज्ञानस्य विक्षेपशक्त्या च शुक्तौ रजतमिति नूतनं वस्तुं प्रतीयते। एवं प्रकृते आत्मनि आवरणशक्त्या स्वस्वरूपम् आच्छादितं भवति, विक्षेपशक्त्या च आत्मस्वभावविरुद्धं कर्तृत्व-भोक्तृत्वादिकम् आत्मनि प्रकाशते। अतः एव हस्तामलके उच्यते -

घनच्छन्नदृष्टिः घनच्छन्नमर्कं

यथा निष्प्रभं मन्यते चातिमूढः।

तथा बद्धवत् भाति यः मूढदृष्टेः

स नित्योपलब्धिस्वरूपोऽहमात्मा॥ इति।

श्लोकस्य सरलार्थस्तावत् – मेघेन यस्य मूढस्य दृष्टिः आवृता वर्तते, स मूढः यथा प्रकाशमानं सूर्यं मेघावृतं निष्प्रभं च मन्यते, तथैव यस्य ज्ञानम् अज्ञानेन आच्छादितं तस्य सकाशे नित्यः चैतन्यस्वरूपः आत्मा अज्ञानेन बद्धः प्रतीयते। तादृशः नित्यज्ञानस्वरूपः आत्मा एव अहम्। अज्ञानम् हि आवरणस्वभावं भवति। अज्ञानस्य तादृशम् आच्छादनसामर्थ्यम् एव आवरणशक्तिरिति निगद्यते। वस्तुतस्तु अधिष्ठानस्वरूपं ब्रह्म कदापि अज्ञानेन आवृतं न भवति। अतः एव "घटः सन्", "पटः सन्" चेत्यादिप्रतीतिषु सदनुविद्धं सत् एव घटपटादिकं भासते।

अधुना संशयो जायते यत् अपरिच्छिन्नं चैतन्यस्वरूपम् असीमम् आत्मानं कथं ससीमं परिच्छिन्नम् अज्ञानम् आवृणोतीति। तदा समाधानमुच्यते यत् वस्तुतस्तु अज्ञानं स्वप्रकाशं सर्वव्यापकं ब्रह्म न आवृणोति। यदा परिच्छिन्नस्य जीवस्य आवरकं भवति अज्ञानं तदा ब्रह्म आवृतमस्ति इति भ्रमवशादेव जीवः मन्यते। अनात्मपदार्थस्य धर्माः यदा अकर्तृत्वाभोक्तृत्वसुखदुःखादिहीने आत्मनि आरोपिताः भवन्ति तदा "अहं कर्ता", "अहं भोक्ता", "अहं सुखी", "अहं दुःखी" च इत्येवं मन्यते मूढः जीवः। आवरणशक्त्या एव अपरिच्छिन्नस्य परमात्मनः कर्तृत्वभोक्तृत्वादिकं सम्भाव्यते। यथा अज्ञानवशादेव असर्पभूतायां रजौ सर्पत्वं सम्भाव्यते। अतः एव सदानन्दयोगीन्द्रेण वेदान्तसारे उच्यते "अनया एव आवरणशक्त्या अवच्छिन्नस्य आत्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसंसारसम्भावना अपि सम्भाव्यते, यथा स्वाज्ञानेन आवृतायां रज्वां सर्पत्वसम्भावना" इति। शक्तिमत्कारणादेव कार्यम् उत्पद्यते। प्रपञ्चरूपकार्यस्य कारणे अज्ञाने कार्यजननानुकूलशक्तिरवश्यम् अस्ति। सृष्टिशक्तिरेव विक्षेपशक्तिः। अज्ञानं यया शक्त्या स्वावृतात्मनि आकाशादिप्रपञ्चम् उद्भावयति सा विक्षेपशक्तिः। वाक्यसुधायाम् उक्तम् – "विक्षेपशक्तिः लिङ्गादिब्रह्माण्डान्तं जगत् सृजेदिति" इति। गुणत्रयस्य मध्ये यदा रजोगुणेन सत्त्वगुणेन वा तमः अभिभूतं न भवति तदा आवरणशक्तेः प्राधान्यं भवति। यदा रजोगुणः गुणान्तरेण अभिभूतो न भवति तदा विक्षेपशक्तेः प्राधान्यं ज्ञेयम्। अद्वैतामोदे उच्यते "रजस्तमोभ्यामनभिभूतं तमः आवरणशक्तिः। ... तमःसत्त्वाभ्याम् अनभिभूतं रजः विक्षेपशक्तिः।" इति। इत्थं तमोगुणप्राधान्येन अज्ञानेन वस्तुस्वरूपस्य आवरणं जायते, रजोगुणप्राधान्येन अज्ञानेन आवृते वस्तुनि नूतनं मिथ्याभूतं वस्तु प्रतीयते इति अवधेयम्।

१५.९) कार्यकारणयोरनन्यत्वम्

कार्यं कारणाद् किम् अत्यन्तं विलक्षणम् आहोस्वित् कार्यं कारणसजातीयम् इति प्रश्नः दर्शनसम्प्रदायेषु आबहोः कालाद् विचार्यते। तत्र कार्यं कारणाद् अत्यन्तमेव विलक्षणम् इति नैके मन्यन्ते। अनेके तु कार्यं कारणसजातीयम् इति पक्षं समर्थयन्ति। अद्वैतवेदान्तिनस्तु कार्यकारणयोः अनन्यत्वम् अभ्युपगच्छन्ति।

दृश्यते हि लोके भोक्ता भोग्यं च भिन्नम्। किञ्च, व्यवहारे प्रपञ्चस्य नानात्वेन प्रतीतिः सर्वलोकप्रत्यक्षीभूता। अस्य कार्यभूतस्य प्रपञ्चस्य कारणं हि ब्रह्म इति अद्वैतवेदान्तिनो मन्यन्ते। अतः कारणं ब्रह्म कार्यं च जगदिति, तयोः कार्यकारणयोः जगद्ब्रह्मणोः सजातीयत्वम् उत अत्यन्तविलक्षणत्वमिति संशयः। सजातीयत्वे जगद्ब्रह्मणोः कार्यकारणभावः युक्तः, विलक्षणत्वे तु कार्यकारणभावः न सङ्गच्छते। ब्रह्म हि नित्यं चेतनं शुद्धं, जगत् च अनित्यम् अचेतनम् अशुद्धं चेति ज्ञायते। अतः तयोः विलक्षत्वमेव अभ्युगन्तव्यम्। न च विलक्षणत्वे कार्यकारणभावो दृश्यते। न हि रुचकादयो विकारा मृत्कारणकाः भवन्ति, शरावादयो वा सुवर्णकारणकाः। यथा मृदा एव मृदन्विता विकाराः क्रियन्ते, सुवर्णेन च सुवर्णान्विताः, तथा इदमपि जगदचेतनं सुखदुःखमोहान्वितं सद् अचेतनस्यैव सुखदुःखमोहात्मकस्य कारणस्य कार्यं भवितुमर्हति, न विलक्षणस्य ब्रह्मणः। ब्रह्मविलक्षणत्वं चास्य जगतः अशुद्ध्यचेतनत्वदर्शनाद् अवगन्तव्यम्। अशुद्धं हीदं जगत्, सुखदुःखमोहात्मकतया प्रीतिपरितापविषादादिहेतुत्वात् स्वर्गनरकाद्युच्चावचप्रपञ्चत्वाच्च। अतः विलक्षणत्वाद् ब्रह्मजगतोः कार्यकारणभावो न सङ्गच्छते इति चेत् न, विलक्षणत्वान्नेदं जगद् ब्रह्मप्रकृतिकम् इति यदुक्तं तन्न सङ्गच्छते। नायम् अव्यभिचरितो नियमो यत् कार्यकारणयोः विलक्षणत्वं न स्यादिति। दृश्यते हि लोके — चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनामुत्पत्तिः, अचेतनत्वेन च प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनाम्। ननु अचेतनानि एव पुरुषादिशरीराणि अचेतनानां केशनखादीनां कारणानि, अचेतनान्येव च वृश्चिकादिशरीराणि अचेतनानां गोमयादीनां कार्याणीति इति चेदुच्यते — एवमपि किञ्चिद् अचेतनं चेतनस्य आयतनभावम् उपगच्छति किञ्चिन्न इत्यस्त्येव वैलक्षण्यम्। महान् चायं पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखादीनां च स्वरूपादिभेदात्, तथा गोमयादीनां वृश्चिकादीनां च। अत्यन्तसारूप्ये च प्रकृतिविकारभाव एव प्रलीयेत। अतः विलक्षणत्वेऽपि जगद्ब्रह्मणोः कार्यकारणभावो न शक्यते हातुम्। श्रुतयो हि प्रपञ्चस्य ब्रह्मकारणतां पुनः पुनः निगदन्ति– "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः" इत्यादिभिः।

ननु विलक्षणत्वेऽपि यदि जगद्ब्रह्मणोः कार्यकारणभावोऽभ्युपगम्यते तर्हि अलं कार्यकारणयोरनन्यत्वस्वीकारेण इति चेन्न, कार्यकारणयोः व्यवहारतः वैलक्षण्ये सत्यपि परमार्थतः अनन्यत्वमेव अवगन्तव्यम्। तथाहि बादरायणकृतं शारीरकमीमांसासूत्रम् – "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति। सूत्रस्यास्य सामान्यार्थो हि कार्यस्य कारणानन्यत्वम् अवगन्तव्यम्, कुतः इति चेत् "वाचारम्भणं विकारो नामधेयम्" इति आरम्भणश्रुतिवशादिति। तथाहि उच्यते भाष्यकारेण शङ्करभगवत्पादेन सूत्रभाष्ये – "अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागम् 'स्याल्लोकवत्' इति परिहारोऽभिहितः; न त्वयं विभागः परमार्थतोऽस्ति, यस्मात्तयोः कार्यकारणयोरनन्यत्वमवगम्यते। कार्यमाकाशादिकं बहुप्रपञ्चं जगत्; कारणं परं ब्रह्म; तस्मात्कारणात्परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते। कुतः। आरम्भणशब्दादिभ्यः।" इति। कार्यकारणयोः अनन्यत्वमेव अवगन्तव्यमिति भाष्यकारस्याशयः। न अन्यः अनन्यः, तस्य भावः

अनन्यत्वम्, तत्समानमित्यर्थः। तेन कारणसमानं कार्यमित्यर्थो लभ्यते। किम् अयमेवार्थः भाष्यकारस्याभिप्रेतः इति चेन्न। भाष्यकारेण तु अनन्यत्वमिति पदस्यार्थः निगदितः व्यतिरेकेण अभावः इति। अस्यार्थो हि कारणव्यतिरेकेण कार्यस्याभावः इति। तथाहि घटस्य कारणं मृत्तिका। मृद्व्यतिरेकेण कार्यस्य घटस्य सत्ता एव न सम्भवति इति कारणात् मृद्घटयोः अनन्यत्वम्। तथा च रज्जौ यदा सर्पः प्रतीयते तदा रज्जुस्वरूपव्यतिरेकेण सर्पो नाम नास्ति किञ्चिदपि। रज्जुसत्ता एव वस्तुतः सर्पस्य सत्ता। अद्वैतिभिः अधिष्ठानसत्ताव्यतिरेकेण आरोपितसत्ता नाङ्गीक्रियते। तस्माद् अधिष्ठानभूतस्य कारणस्य सत्ता एव वस्तुतः मिथ्यारूपेण प्रतीयमानस्य विकारभूतस्य कार्यस्य सत्ता। रज्जुः नास्ति चेत् कदाचिदपि सर्पो न प्रतीयेत। एवं रज्जुव्यतिरेकेण प्रतीयमानस्य सर्पस्य यः अभावः तदेव कार्यकारणयोः अनन्यत्वमिति ज्ञेयम्। कार्यकारणयोरनन्यत्वे छान्दोग्यश्रुतिरेव प्रमाणभूता। तथाहि आम्नायते छान्दोग्योपनिषदि षष्ठाध्याये – "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा. उ. ६.१.४) इति। अस्यार्थः – यथा एकेन मृत्पिण्डेन परमार्थतो मृत्स्वरूपेण विज्ञातेन सर्वं मृन्मयं घटशरावोदञ्चनादिकं मृदात्मकत्वाविशेषाद् विज्ञातं भवेत्; तथैव एकेन ब्रह्मणा विज्ञातेन तद्विवर्तभूतं नामरूपात्मकं जगदपि विज्ञातं भवेद् इति अवधेयम्। यतो वाचारम्भणं विकारो नामधेयम् — वाचैव केवलम् अस्तीति आरभ्यते — विकारः घटः शराव उदञ्चनं चेति; न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति; नामधेयमात्रं ह्येतदनृतम्; मृत्तिकेत्येव सत्यम् — एवं कार्यभूतः प्रपञ्चोऽपि नामधेयमात्रम् अनृतम्, कारणं ब्रह्मैव सत्यमिति तात्पर्यम्। एवं ब्रह्मव्यतिरेकेण कार्यजातस्याभाव इति दृष्टान्तस्यास्य निष्कर्षः। वस्तुतः तेनैव एकविज्ञानेन सर्वविज्ञानम् इति प्रतिज्ञा उपपद्येत। यदि कार्यकारणयोः अनन्यत्वम् नाभ्युपगम्येत तर्हि एकविज्ञातेन सर्वविज्ञानमिति प्रतिज्ञा नैव उपपद्येत। तस्मात् स्वीकार्यं कार्यकारणयोः अनन्यत्वम्।

पाठगतप्रश्नाः-३

१९. सत्त्वगुणस्य तारतम्यानुसारेण अविद्या माया चेति अज्ञानस्य द्विरूपता केन कल्पिता।

क) विद्यारण्यस्वामिना ख) सदानन्दयोगीन्द्रेण

ग) गौडपादाचार्येण घ) शङ्कराचार्येण

२०. अद्वैतवेदान्तमते ईश्वरः जगतः -

क) उपादानकारणमात्रम् ख) निमित्तकारणमात्रम्

ग) अभिन्ननिमित्तोपादानकारणम् घ) किमपि न।

२१. जगतः परिणाम्युपादानकारणं किम्।

२२. जगतः विवर्तोपादानकारणं किम्।

२३. अज्ञानस्य शक्तिद्वयं किम्।

२४. कार्यकारणयोरनन्यत्वं नाम किम्।

२५. कार्यकारणयोरनन्यत्वे श्रुतिप्रमाणं किम्।

पाठसारः

दर्शनानाम् आलोचितविषयेषु अन्यतमत्वात् अद्वैतवेदान्तदर्शने सृष्टितत्त्वं विचार्यते। अद्वैतमते परमार्थतः सृष्टिरेव नास्ति, व्यवहारतः एव सृष्टिः। अद्वैतदृष्ट्या सृष्टिश्रुतीनां तात्पर्यं तु ब्रह्मतत्त्वावबोधने। तस्मादेव अध्यारोपापवादन्यायम् आश्रित्य सृष्टितत्त्वं वर्णयति श्रुतिरिति तेषामभिप्रायः। जगत्सृष्टिर्हि ईश्वरस्य लीलारूपा, न तु अत्र प्रयोजनं किञ्चिदन्वेष्टव्यम्। ईश्वरो हि प्राणिनां सृज्यमानकर्माणि अपेक्ष्य जगत्सृष्टिं करोतीत्यतः वैषम्यनैर्घृण्यदोषः तस्मिन् न आपपति। सृष्टेः मूलं कारणं तावद् अज्ञानाभिधेया माया। मायोपाधिकः ईश्वरः प्रपञ्चस्य अभिन्ननिमित्तोपादनकारणम्। माया तु परिणाम्युपादानकारणम्, ईश्वरस्तु विवर्तोपादानकारणमिति ज्ञेयम्। तस्याज्ञानस्य आवरणविक्षेपरूपं शक्तिद्वयं विद्यते। आवरणशक्त्या ब्रह्मस्वरूपम् आच्छाद्यते विक्षेपशक्त्या च प्रपञ्चः सृज्यते। आपाततः जगत् ब्रह्मभिन्नत्वेन प्रतीयते चेदपि ब्रह्मविवर्तत्वेन ब्रह्माभिन्नमेव जगदिति अङ्गीकर्तव्यं, कार्यकारणयोः अनन्यत्वनियमात्। कार्यकारणयोरनन्यत्वं नाम कारणव्यतिरेकेण कार्यस्याभावः। एवं ब्रह्मव्यतिरेकेण नास्ति जगतः सत्तेति अवधेयम्।

पाठान्तप्रश्नाः

१. अद्वैतवेदान्तिनः परमार्थतः सृष्टिं किमर्थं नाङ्गीकुर्वन्ति इति विचारयत।

२. अद्वैतमते सृष्टिश्रुतीनाम् आशयं वर्णयत।

३. अध्यारोपापवादन्यायस्य तात्पर्यं लिखत।

४. विवर्तवादविषये परिणामवादविषये च लघुटिप्पणीं लिखत।

५. अद्वैतमते सृष्टेः प्रयोजनम् अस्ति न वेति विचारयत।

६. ईश्वरस्य अभिन्ननिमित्तोपादनकारणत्वम् प्रतिपादयत।

७. वैषम्यनैर्घृण्यदोषः ईश्वरे किमर्थं न आपततीति विचारयत।

८. अज्ञानस्य शक्तिद्वयम् आलोचयत।

९. कार्यकारणयोरनन्यत्वम् अद्वैतवेदान्तदृष्ट्या प्रतिपादयत।

पाठगतप्रश्नानाम् उत्तराणि

पाठगतप्रश्नाः-१

१. न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ इति।

२. मन्दानां कृते।

३. सविशेषं निर्विशेषं चेति द्विविधं रूपम्।

४. निर्विशेषं ब्रह्म हि नामरूपोपाधिविवर्जितं शुद्धं स्वरूपम् सत्यज्ञानानन्तादिपदलक्ष्यम्।

५. नामरूपोपाधिविशेषसम्बन्धित्वात् ब्रह्मणः सविशेषत्वम्।

६. सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था।

७. ग) अध्यारोपापवादन्यायः।

८. अध्यारोपो नाम वस्तुनि अवस्त्वारोपः।

९. अपवादो नाम "रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्" इति।

१०. रज्जौ सर्पारोपः।

पाठगतप्रश्नाः-२

११. परिणामभावो नाम वस्तुनो यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपान्तरापत्तिः, यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिणमते।

१२. स्वस्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः विवर्तः इति। यथा - शुक्तिका स्वस्वरूपापरित्यागेन रजतरूपेण मिथ्या प्रतीयते।

१३. अप्पय्यदीक्षितमते समसत्ताकोऽन्यथाभावः परिणामः, विषयसत्ताकोऽन्यथाभावः विवर्तः चेति।

१४. पारमार्थिकी सत्ता, व्यावहारिकी सत्ता, प्रातिभासिकी च सत्ता।

१५. पारमार्थिकसत्ताबाध्यत्वम्।

१६. ख) लीलारूपा।

१७. धर्माधर्माख्यानि कर्माणि।

१८. सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिः।

पाठगतप्रश्नाः-३

१९. क) विद्यारण्यस्वामिना।

२०. ग) अभिन्ननिमित्तोपादनकारणम्।

२१. अज्ञानाभिधेया माया।

२२. ईश्वरः।

२३. आवरणशक्तिः, विक्षेपशक्तिश्चेति।

२४. कारणव्यतिरेकेण कार्यस्याभावः इति।

२५. "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति।

॥ इति पञ्चदशः पाठः ॥